MSS No. 147 Subject Philosophy


Name of MSS ~~न्याय पत्रावलि~~ Nyāyamuktāvali

Author -

Period - - Folios 34 (Wrong Pagination)

Script Sanskrit Source Prithipal Singh

Missing Folios - -



न्या॰
मु॰
२९

पोघटादिनासंबंधः पुरुषेकर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्चाभेदाग्रहात् ममेदं
कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिंबादतात्विको दर्पणस्येव
मुखोपरागः इदमिति विषयोपरागः इंद्रियप्रणालिकाया परिणतिभेदः तात्विकोनि
श्वासाभिहतदर्पणस्येव मालिन्यमिमा कर्त्तव्यमिति व्यापारांशः तेनांशत्रयवती बु
द्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्विकः संबंधः दर्पणस्य मलिनिम्नेव मु
खस्योपलब्धिरुच्यते ज्ञानवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव
कृतिसामानाधिकरण्येन प्रतीतेः नच बुद्धेश्चेतनता परिणामित्वादितिमत
मपास्तम् कार्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः तद्वि
नैमानाभावाच्च चेतनोहंकरोमि इतिप्रतीतेः चैतन्यांशप्राप्तम इति चेत् कल्पतेसौ
पि किंनेष्यते अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावो नित्यत्वे नात्यंतमसंसारापत्तिः अ

२९

नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः यः सर्वज्ञः इत्याद्यनु
रोधात् आनंदमित्यस्याप्यानंदवदित्यर्थः अर्शआदित्वान्मत्वर्थीयाच्प्रत्ययः अ
न्यथा पुल्लिंगत्वापत्तेः आनंदोपि दुःखाभावेनोपचर्य्यते भाराद्यपगमे सुखी संवृत इ
तिवत् अस्तु वा तस्मिन्नानंदो नत्वसावनंदः असुखमिति श्रुतेः न विद्यते सुखं यस्मि
न्निति कुतो नार्थ इति चेन्न क्लिष्टकल्पनापत्तेः प्रकरणाविरोधाद्यानंदमित्यत्र मत्व
र्थीयस्य च प्रत्ययविरोधाच्चेति संक्षेपः एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाश
वन्निर्लेपः किंतु चेतनः कार्यकारणयोरभेदात्कार्यनाशे सति कार्यरूपतया
नाशेपि न स्वादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या त
त्कल्पनं बुद्धिश्च प्रकृतेः परिणामः सैव महत्तत्त्वमंतःकरणमित्यप्युच्यते तत्सत्वा
सत्वाभ्यां पुरुषस्य संसारापवर्गौ नस्यात्वेंद्रियप्रणालिकया परिणति ज्ञानरू

न्या॰ मु॰ ६६

नोविभागस्तत आरम्भकसंयोगनाशः परमाण्वन्तरकर्मणि ततो द्व्यणुकनाशः
परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः ततः श्यामादिनाशो विभागाच्च पू
र्वसंयोगनाश इत्येकः कालः ततो रक्तोत्पत्तिर्द्व्यारम्भकसंयोग इत्येकः कालः
अपद्व्यणुकोत्पत्तिः अपरक्तोत्पत्तिरिति पंचक्षणा द्व्यणुकनाशसमकाले परमाण्व
न्तरकर्मचिन्तनात् षट्क्षणोत्पत्तिः तथा हि परमाणुकर्मणा परमाण्वन्तरवि
भागस्तत आरम्भकसंयोगनाशः ततो द्व्यणुकनाशः परमाण्वन्तरकर्मणि
अपश्यामादिनाशः परमाण्वन्तरेकर्मजविभागश्च ततो रक्तोत्पत्तिः परमा
ण्वन्तरेपूर्वसंयोगनाशश्च ततः परमाण्वन्तरसंयोगस्ततो द्व्यणुकोत्पत्तिः
अपरक्तोत्पत्तिः एवं श्यामनाशाद्वा परमाण्वन्तरकर्मचिन्तनाद्वा सप्तक्षणाः
तथा हि परमाणौ कर्म ततः परमाण्वन्तरविभागस्ततः आरम्भकसंयोगना

६१ २५

ततो द्व्यारंभकसंयोगनाशः ततो द्व्यणुकनाशः १ ततो द्व्यणुकनाशविशिष्ट २
कालमपेक्ष्य विभागजविभागश्यामनाशो २ ततः पूर्वसंयोगनाशरक्तोत्पत्तिः ३
ततो उत्तरदेशसंयोगः ४ वह्निनोदनजन्यपरमाणुकर्मनाशः ५ ततोऽदृष्ट
वशाद्द्व्यणुकसंयोगाद्द्व्यारम्भानुगुणक्रिया ६ ततो विभागः ७ ततः पूर्वसंयो
गनाशः ८ ततो द्व्यारम्भकसंयोगः ९ ततो द्व्यणुकोत्पत्तिः १० ततो रक्तो
त्पत्तिः ११ मध्यमश्यामवदेकस्मादग्निसंयोगान्नरूपननाशरक्तोत्पत्तिः
नावत्कालमिकस्थायेनरस्थिरत्वात् किंच नाशक एव यद्युमादकालत्ता
नष्टेकपादावग्निनाशे नीरूपपार्थिवपरमाणुः स्यात् नाशकस्य दृष्टत्वाद्
कालस्य रक्तोत्पत्तौ तदग्निनाशे नीरूपपरत्न नगतोन्स्याग्नेः परमाणवन्तरे कर्म
चिंतनात् पंचमादित्वेनापि गुणोत्पत्तिः तथाहि एककेन परमाणौ कर्म तः

न्या॰ मु॰

निर्गुणे द्व्यणुके द्व्यारंभानुगुणक्रियानुत्पत्तेश्च तथापि परमाणौ श्यामादिनिवृ
त्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न पूर्वरूपध्वंसस्यापि रूपान्तरे हेतुत्वात्॥
इति नवक्षणाः अथ दशक्षणाः स चारम्भकसंयोगध्वंसविनाशविशिष्टकालमपे
क्ष्य विभागेन विभागजनने सति स्यात् तथाहि वह्निसंयोगाद्व्यणुकारम्भके प
रमाणौ कर्म ततो विभागः ततश्चारम्भकसंयोगनाशः ततो द्व्यणुकनाश
विभागजविभागौ १ ततः श्यामनाशपूर्वसंयोगनाशौ २ ततो रक्तोत्पत्त्युत्त
रसंयोगौ ३ ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः ४ ततोऽदृष्टव
दात्मसंयोगाद्व्यारम्भानुगुणक्रिया ५ ततो विभागः ६ ततश्च पूर्व
संयोगनाशः ७ ततश्चारम्भकसंयोगः ८ ततो द्व्यणुकोत्पत्तिः ९ अथ र
क्तोत्पत्तिः १० अथैकादशक्षणाः वह्निसंयोगात्परमाणौ कर्म ततो विभागः

नेपूर्वसंयोगनाशापेक्षणादसंभवापत्तेरिति नचयदिद्रव्यारंभकसंयोगविना
शविशिष्टकालमपेक्ष्यविभागजविभागःस्यात्तदादशक्षणा अथद्रव्यनाश
विशिष्टकालमपेक्ष्यविभागजविभागस्स्यात् तदैकादशक्षणा तथाहि अथन
वक्षणाः वह्निसंयोगात्परमाणौकर्मततः परमाण्वंतरेणविभागः ततः आ
रंभकसंयोगनाशस्ततोद्व्यणुकनाशः १ ततः परमाणौश्यामादिनाशः २ ततो
रक्ताद्युत्पत्तिः ३ ततोद्रव्यारंभानुगुणाक्रिया ४ ततोविभागः ५ ततःपूर्वसं
योगनाशः ६ तत आरंभकसंयोगः ७ ततोद्व्यणुकोत्पत्तिः ८ ततोरूपाद्युत्पत्तिः ९
ननुश्यामादिनिवृत्तिक्षणेरक्तोत्पत्तिक्षणेवापरमाणौद्रव्यारंभानुगुणाक्रि
यास्त्वितिचेन्न अग्निसंयुक्तेद्रव्यारंभकपरमाणौयत्कर्मतद्विनाशमंतरेणागु
णोत्पत्तिमंतरेणचतत्रपरमाणौक्रियांतराभावात्कर्मवतिकर्मांतरानुत्पत्ते

५ यावदाश्रयप्रतीतिजन्यप्रतीतिविषयत्वं व्यासज्यवृत्तित्वं

सा॰ टि॰ ६

प्रत्यभिज्ञातं तावदवयविना प्रागपि व्यवह्रियते संख्यां निरूपयति गणनव्यवहारे तु हे
तुः संख्याभिधीयते गणनव्यवहारासाधारणं कारणं संख्येत्यर्थः नित्येषु नि
त्यमेकत्वमनित्येऽनित्यमभिधीयते द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः अने
काश्रयपर्याप्ता एते तु परिकीर्तिताः नित्येषु परमाण्वादिषु एकत्वं नित्यं अनित्ये
घटादावेकत्वमनित्यमित्यर्थः द्वित्वादयो व्यासज्यवृत्तिसंख्याः अपेक्षाबुद्धिज
न्या अनेकेति यद्यपि द्वित्वादिसंबन्धः प्रत्येकं घटादावपि वर्त्तते तथापि एको
द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्ति
लक्षणः कश्चित्संबंधोऽनेकाश्रयोऽभ्युपेयते अपेक्षाबुद्धिनाशाच्चैतेषां ना
शो निरूपितः प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः ततो विशेषणज्ञानं द्वित्व
त्वनिर्विकल्पकं ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च ततो द्वित्वना
श इति यद्यपि ज्ञानानंतरं द्वितक्षणस्यापि योग्यविभुविशेषगुणानां स्वोत्तरव

एकत्वान्यसंख्या
प्रतीत्याश्रयपर्व
नियावच्छेदकत्वज्ञानं
कारणम् ।

शः ततो द्व्यणुकनाशः ततो द्व्यणुकनाशः ततः श्यामनाशः परमाण्वंतरकर्मोत्पत्ति
ततो रक्तोत्पत्तिः परमाण्वंतरकर्मजौ विभागो ततः परमाण्वंतरे पूर्वसंयोगनाशः ततः प
रमाण्वंतरेण संयोगः ततो द्व्यणुकोत्पत्तिस्ततो रक्तोत्पत्तिरिति रक्तोत्पत्तिसमकालं पर
माण्वंतरे कर्मचिंतनात् अष्टक्षणाः परमाणौ कर्म ततः परमाण्वंतरे विभागः ततः आ
रंभकसंयोगनाशः १ ततः श्यामनाशः २ ततो रक्तोत्पत्तिपरमाण्वंतरकर्मणी ३
ततः परमाण्वंतरे कर्मजविभागश्च ४ ततः परमाण्वंतरे पूर्वसंयोगनाशः ५
ततः परमाण्वंतरे संयोगः ६ ततो द्व्यणुकोत्पत्तिः ७ अथ रक्तोत्पत्तिरिति नैया
यिकानां तु नैव द्व्यणुकादावपीष्यते नैयायिकानां मते द्व्यणुकादाववयविनि
अपि पाको भवति तेषामयमाशयः अवयविनां सच्छिद्रत्वात् वह्नेः सूक्ष्मावय
वैः अंतः प्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते अनंतावयवतन्ना
शकल्पने गौरवं च उक्तं च सोयं घट इत्यादौ प्रत्यभिज्ञा च संगच्छते यत्र तु न

द्विगुणनाशपत्वात् न चापेक्षाबुद्धेस्त्रिक्षणस्थायित्वं कल्प्यते अन्यथा द्वित्वस्य
निर्विकल्पककाले अपेक्षाबुद्धिनाशानन्तरं द्वित्वस्यैव नाशः स्यात् ननु द्वित्वप्रत्य
क्षं तदानीं विषयाभावात् विद्यमानविषयस्यैव चक्षुरादिना ज्ञानजननोपगमा
२ त् तस्माद्द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते न चापेक्षाबुद्धिनाशात् कथं
द्वित्वनाश इति वाच्यं कालान्तरे द्वित्वप्रत्यक्षाभावात् अपेक्षाबुद्धिस्तु त्र्यादिकान्त
नाशः तन्नाशक इति कल्प्यते अत एव ननुरूषीयापेक्षाबुद्धिजन्यं द्वित्वादिकं तेनै
व गृह्यते इति कल्प्यते न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमिति वाच्यं लाघवेन द्वि
त्वप्रति कारणत्वस्यैवोचितत्वात् अतीन्द्रियद्व्यणुकादावपेक्षाबुद्धिर्योगिनां स
र्गादिकालीनपरमाण्वादौ ईश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षा
बुद्धिर्वा द्वित्वादिकारणमिति अपेक्षाबुद्धिं कल्पयन्नाह अनेकैकत्वबुद्धिर्या सापे
क्षाबुद्धिरिष्यते अयमेकः अयमेक इत्याकारिकेत्यर्थः परिमाणं निरूपयति

कुर्वेऽर्हणुत्वाद्वित्वो
त्पत्तिविनाशोऽहीन
अपेक्षाबुद्ध्युत्पत्तिवि
नाशयोः कारणत्वा
त्

वृद्धं ननु बोधं पक्षानियमेकत्वज्ञानं तत्र बिल्वादिभिन्नाबहुत्वं हस्वोम युते यथा सेनादावितिकंदलीकारः आचार्यस्तु बिल्वादिकमेव बहुत्वं मन्यते तथा च
त्रित्वत्वादिव्यापिका बहुत्वजातिः सेनादावुत्पत्तिरपि बिल्वादौ त्रित्वाबाधय अर्हदोषात् इमंच इतो बहुतरे यं सेनेति प्रतीतिरुत्पद्यते बहुत्वस्य संख्यान्तरत्वे
तु तारतम्याभावादिति बोध्यम् २

ए

न्या॰ (म) १८

परिमाणं भवेन्मानव्यवहारैककारणम् अणुदीर्घमहद्ध्रस्वमिति तद्भेद ईरितः
परिमाणव्यवहारासाधारणकारणं परिमाणमित्यर्थः तच्चतुर्विधम् अणुम
हद्दीर्घह्रस्वं चेति तत्राणुत्वह्रस्वत्वे च समानियते महत्त्वदीर्घत्वे च समनियते
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं संख्यातः परिमाणाच्च प्रचयादपि जा
यते तत्परिमाणं नित्यमित्यत्र परिमाणमित्यनुषज्यते जायत इत्यत्रापि परिमा
णमित्यनुवर्तते अनित्यमिति पूर्वेणान्वेति तथा चानित्यपरिमाणं संख्याजन्यं
परिमाणजन्यं प्रचयजन्यं चेत्यर्थः तत्र संख्याजन्यमुदाहरति अनित्ये द्व्यणु
कादौ तु संख्याजन्यमुदाहृतम् द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमा
णुपरिमाणं द्व्यणुकपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्ट
परिमाणजनकत्वात् द्व्यणुकपरिमाणं तु परमाणुपरिमाणापेक्षया नोत्कृ
ष्टं त्रसरेणुपरिमाणं तु न सजातीयमतः परमाणोर्द्वित्वसंख्याद्व्यणुकपरि

परत्वं चापरत्वं च द्विविधं परिकीर्तितं दैशिकं कालिकं चेति तत्रैव तत्र दैशि के
परत्वं मूर्त्तसंयोगभूयस्त्वज्ञानतो भवेत् अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितं
दैशिकं परत्वं बहुतरमूर्त्तसंयोगान्तरितत्वज्ञानादुत्पद्यते एवं तदल्पीयस्त्वज्ञाना
दपरत्वं अत्रावधित्वार्थे पंचम्युपादानाय यथा पाटलीपुत्रात्काशीमपेक्ष्य प्रयागः
परः पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति तयोरसमवायी स्याद्दि
क्संयोगस्तदाश्रये तयोर्दैशिकपरत्वापरत्वयोरसमवायी असमवायीकार
णं तदाश्रये दैशिकपरत्वापरत्वाश्रये दिवाकरपरिस्पंदभूयस्त्वज्ञानतो
भवेत् परत्वमपरत्वं तु तदल्पत्वबुद्धितः अत्रैवासमवायी स्यात्संयोगः
कालपिंडयोः अत्र परत्वमपरत्वं च कालिकं ग्राह्यं यस्य सूर्यपरिस्पन्दोप
नीयाय स्य सूर्यपरिस्पन्दोऽधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः कालिकप
रत्वापरत्वजन्यद्रव्य एव अत्र कालिकपरत्वापरत्वयोः अपेक्षाबुद्धिनाशान

न्या॰ मु॰ ७१

नाशास्तेषामुदाहृतः तेषां कालिकदैशिकपरत्वापरत्वानाम् क्रमप्राप्तां बुद्धिं
निरूपयति बुद्धेः प्रपंचः प्रागेव प्रायशो विनिरूपितः अथावशिष्टोऽप्यपरः प्र
कारः प्रदृश्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते तत्राप्रमां निरूप
यति तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता तदभाववति तत्प्रकारकं
ज्ञानं भ्रमः तत्प्रपंचो विपर्यासः संशयोऽपि प्रकीर्तितः तत्प्रपंचोऽप्रमाप्रपञ्चः
आद्यो देहेष्वात्मबुद्धिः शंखादौ पीततामतिः भवेन्निश्चयरूपा सा संशयोऽथ प्र
दृश्यते आद्यो विपर्यास इत्यर्थः शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञा
नं गौरोऽहमित्याद्याकारकम् एवं शंखादौ पीतः शंख इत्याकारकं ज्ञानं निश्च
यरूपं यत्तद्भ्रम इति किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः किंस्विदि
ति वितर्के निश्चयलक्षणमाह तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः
तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः संशयलक्षणमाह स संशयो

अभिघातो नोदनं च शब्दहेतुरिहादिमः शब्दहेतुर्द्वितीयास्यात् विभागोत्रि
धा भवेत् सन्निपातः संयोगः द्वितीय उभयकर्मजः तृतीय इति संयोगजसं
योग इत्यर्थः तृतीयः स्यादिति पूर्वेणान्वितः आदिमोभिघातो द्वितीयो नोदना
ख्यस्संयोग इत्यर्थः विभक्तप्रत्ययासाधारणकारणं विभागस्तं निरूपयति विभा
गेति एककर्मोद्भवस्त्वाद्यः कर्मद्वयभवोपरः विभागजस्तृतीयस्स्यात्तृती
योपि द्विधा भवेत् हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः उदाहरणं तु श्ये
नशैलादिविभागाद्विकं पूर्ववद्बोध्यम् तृतीयो विभागजविभागः कारणमात्र
विभागजन्यः कारणाकारणविभागजन्यश्चेति आद्यस्तावद्यत्र कपालेक
र्मततः कपालद्वयविभागः ततो घटारंभकसंयोगनाशस्ततो तेनैव कपाल
विभागेन सकर्मणः कपालस्याकाशादिविभागो जन्यते तत आकाशादिसं

संयोगप्रतिद्वंद्विविभागजनकत्वविरोधात् अन्यथाविकुर्वत्कर्मत्वस्वभावभंगप्रसंगात् तस्माद्यद्यपीदम नारंभक ३

ना°
अ.

योगनाशस्ततउत्तरदेशसंयोगस्ततः कर्मनाश इति नचैतेन कर्मणैव कुतो देशांतर
विभागो न जन्यत इति वाच्यं एकस्य कर्मण आरंभकसंयोगप्रतिद्वंद्विविभागजन
कत्वस्य अनारंभकसंयोगप्रतिद्वंद्विविभागजनकत्वेन तदारंभकसंयोगप्रतिद्वंद्वि
भागं न जनयेत् न च कारणविभागेनैव पूर्वं कुतो देशांतरविभागो न जन्यत इति
वाच्यं आरंभकसंयोगप्रतिद्वंद्विविभागवतोऽवयवस्य प्रतिद्रव्ये देशान्तरावि
भागासंभवात् द्वितीयस्तावत् यत्र हस्तक्रियया हस्तेन तरुविभागस्ततः शरीरे
विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं व्यधिक
रणत्वात् शरीरे तु क्रिया नास्ति अवयविकर्मणो यावदवयवकर्मनियत
त्वात् अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति प्र
तएव विभागो गुणान्तरम् अन्यथा शरीरे विभक्तप्रत्ययो न स्यात् अतः संयो
गनाशेन विभागो नान्यथा सिद्धो भवति परापरव्यवहारनिमित्ते परापरत्वेनि·

माणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः प
रिमाणजन्यमुदाहरति परिमाणं घटादौ तु परिमाणजमुच्यते घटादिपरिमा
णं कपालादिपरिमाणजन्यं प्रचयजन्यमुदाहरतुं प्रचयं निर्वक्ति प्रचयः शिथि
लाख्यायः संयोगस्तेन जन्यते परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः ना
श इति अर्थात्परिमाणस्य पृथक्त्वं निरूपयति संख्यावत्पृथक्त्वं स्यात्पृथक्
प्रत्ययकारणं संख्यावदिति पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वं तन्नि
त्यतादिकं संख्यावत् यथा नित्येष्वेकत्वं नित्यमनित्येष्वनित्यमेकत्वं तु आश्र
यद्वितीयक्षणे चोपद्यते आश्रयनाशान्नश्यति तथैकपृथक्त्वमपि द्वित्वादि
वत् द्विपृथक्त्वादिकमपीत्यर्थः ननु अयमस्मात्पृथगित्यादावन्योन्याभावो भा
सते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते इति न चाल पृथक्त्वं न तत्वतोन्यभावा

न्या
मु
६९

इतिवाच्यम् रूपंपुनघटइतिप्रतीत्यनापत्तेः नहिरूपेघटावधिकंपृथक्त्वं गुणान्त
रमस्ति नवाघटेत्वघटावधिकपृथक्त्वमस्तियेन पर परासबंधः कल्प्यते इत्यत आ
ह अन्योन्याभावतोनास्य चरितार्थत्वमिष्यते अस्मात्पृथगिदंनेतिप्रतीतिर्हि
विलक्षणा ननुशाब्दवैलक्षण्यमेव नतत्वर्थवैलक्षण्यमिति चेन्न विनापिभेदंघ
टात्पृथगितिवत् घटेनेत्यत्रापि पंचमीस्यात् तस्माद्यद्दर्पकेयोगपञ्चमीसो
पीनअर्पीन्योन्याभावतोभिन्नोगुणान्तरकल्प्यते इति संयोगंनिरूपयति अप्राप्त
योस्तुयाप्राप्तिः सैवसंयोगईरितः तंविभजते कीर्त्तितस्त्रिविधस्त्वेषआद्योऽन्यत
रकर्मजः तथोभयस्पन्दजन्योभवेत्संयोगजोऽपरः तेषुः संयोगाः आदिमः श्येन
शैलादिसंयोगः परिकीर्त्तितः मेषयोस्सन्निपातोयस्सद्वितीयउदाहृतः कपाल
तरुसंयोगात्संयोगस्तरुकुम्भयोः तृतीयस्स्यात्कर्मजोपिद्विधैवपरिकीर्त्तितः

न्या०

७२

अननुगतानां तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धं गुणस्य प्रमाजनकत्वं च
नुमानात् सिद्धं यथा प्रमाज्ञानं सामान्यकारणभिन्नकारणजन्यं जन्यज्ञानत्वा
त् अप्रमावत् न च दोषाभाव एव कारणमस्त्विति वाच्यम् पीतः शंख इति ज्ञानस्य
त्वपित्तरूपसत्त्वाच्छंखे प्रमानुमितिप्रसंगात् विनिगमनाविरहाद् नैतद्दोषाभा
वकारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वात् न च गुणस्यैवापि पित्तेन प्रतिबं
धाच्छंखे न श्वेतज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यम्॥
तथा च किं गुणस्य हेतुत्वकल्पनेनेति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुण
स्यापि हेतुत्वसिद्धेः एवं च भ्रमं प्रति गुणाभावः कारणमित्यस्यापि हेतुत्वं वक्तव्य
त् अत्र दोषाः के इत्याकांक्षायामाह पित्तदूरत्वादिरूपो दोषो नानाविधो मतः क्व
चित् पीतादिभ्रमे पित्तादिदोषः क्वचिच्चन्द्रादेः स्वल्पपरिमाणग्रहे दूरत्वं दोषः क्व
चिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनं दोषाः अननुगता एव भ्रान्तिजनकाः स्मृताः॥

१२

मतिर्यास्यादेकत्राभावभावयोः एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं
संशय इत्यर्थः साधारणादिधर्मस्य ज्ञानं संशयकारणम् उभयसाधारणो यो
धर्मस्तद्ज्ञानं संशयकारणं यथोच्चैस्त्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्था
णुर्न वेति संदिग्धे एवमसाधारणधर्मज्ञानमपि कारणं यथा शब्दत्वं नित्या
नित्यव्यावृत्तमपि शब्दे गृहीत्वा शब्दो नित्यो न वेत्यादि संदिग्धे विप्रतिपत्तिस्तु शा
ब्दो नित्यो न वेत्यादि शाब्दात्मिका न संशयकारणं शब्दव्याप्तिज्ञानादीनां निश्च
यमात्रजनकत्वस्वाभाव्यात् किंतु तत्र शाब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मा
नस एव इति एवं ज्ञानेष्वप्रामाण्यसंशयात् विष[illegible]संशय इति एवं व्याप्यसंशया
दपि व्यापकसंशय इति इत्यादि बोध्यम् किंतु संशये धर्म्मिज्ञानं धर्मेन्द्रियस
न्निकर्षो वा कारणमिति दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् प्र
मां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्रापि पित्तादिरूपा दोषा

न्या· मु

देनुवोधकम् येनसंबंधेन यद्ज्ञातेनसंबंधेनतद्विशेष्यकत्वं तेनसंबंधेनतत्प्रकारक
त्ववाचं तेनकपालादेसंयोगादिनाघटादिज्ञानेनातिव्याप्तिः एवंसतिनिर्विकल्पके
प्रमात्वस्यात् तस्यप्रकारत्वाभावात् अतआह नप्रमानापिभ्रमस्यान्निर्विकल्पकम्
प्रकारतादिशून्यंहिसंबंधानवगाहितत् ननु वृक्षेकपिसंयोगज्ञानंभ्रमःप्रमाचस्या
द्विनिचेन्न प्रतियोगिव्यधिकरणकपिसंयोगाभाववतिकपिसंयोगिभेदवतिवासं
योगज्ञानस्यभ्रमत्वात् नचकपिसंयोगानवच्छेदकावच्छेदेनसंयोगज्ञानंभ्रमोन
स्यात् तत्रसंयोगानवच्छेदकावच्छेदेनसंयोगज्ञानस्यभ्रमत्वात् तदप्यस्यानत्रुआ
माह्लक्षणानुगमेपिनक्षतिः प्रामाण्यंनस्वतोग्राह्यंसंशयानुपपत्तेरिति मी
मांसकाहि प्रामाण्यंस्वतोग्राह्यमितिवदन्ति तत्रगुरुणांमतेज्ञानस्यस्वप्रकाशत्वा
तद्ज्ञानप्रामाण्यंतेनैवगृह्यते इति भट्टानांमतेतुज्ञानमतीन्द्रियंज्ञानजन्यज्ञाततयाः ता

ग्रथके गुणए इत्याकांक्षायां प्रत्यक्षत्वादि प्रमायां क्रमेण गुणान् दर्शयति प्रत्यक्षे तु विशे
ष्येण विशेषणवता समं सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः प्रत्यक्षे विशेष
वद्विशेष्यसन्निकर्षो गुणः पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् अनुमितौ साध्य
वति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः एवमग्रेपि ज्ञेयम् शक्ये सादृश्यबुद्धिस्तु भवेदुप
२ मितौ गुणः शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा गुणः स्यात् प्रमां निरू०
भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ननु यत्र शुक्तौ रजतयोरिमे रजते इति ज्ञानं जा
तं तत्र रजतांशेपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावादत आह अथवा तत्
त्प्रकारं यद्ज्ञानं तद्वद्विशेष्यकं तत्प्रमा तद्वद्विशेष्यकत्वे सति तत्प्रकारकं प्रमे
त्यर्थः अथैवं स्मृतेरपि प्रमात्वं स्यात् अतः किमिति चेत्तथा सति तत्करणस्य प्रमाणा
न्तरत्वं स्यादिति चेन्न यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् इ

न्या॰
न्ये
७४

६

षामेव ज्ञानानां यथार्थत्वात् प्रमात्वलक्षणे नैद्धिशेष्यकत्वं विशेषणं व्यर्थं न च रंगे
रजतार्थिनः प्रवृत्तिर्भ्रमजन्यानस्यात् तवमते भ्रमस्याभावादिति वाच्यम् तत्रं दोषा
धीनस्यापुरोवर्त्तिनि स्वतंत्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् सत्यरजतस्थलेतु
विशिष्टज्ञानस्य सत्वात् तदेव कारणं अस्तु वा तत्रापि भेदाग्रह एव कारणमिति न
चान्यथाख्यातिः संभवति रजतमन्यत्तत्कारणस्य रजते सान्निकर्षस्याभावात् रंगे रज
तबुद्धेरनुपपन्नेरितिचेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः
क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात् न च संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ
तु भेदाग्रहः कारणमिति वाच्यं लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् भ्रमं च
रंगे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेन न क्षतिः केवलमु
भयोरग्रहणादोषात् किंच रंगरजतयोरिमे रजते इति ज्ञानं न तत्र कारणबाधोपि
त्रापि च यत्र रंगरजतयोरिमे रंगरजते इति ज्ञानं तत्रोभयत्र युगपत् प्रवृत्तिनिवृत्ती

२

७४

प्रवृत्तत्वात्तया च ज्ञानमनुमीयते मुरारीमिश्राणांमतेऽनुव्यवसायेन ज्ञानं गृह्यते
सर्वेषांमतेऽपितद्विषयकज्ञानेन न तज्ज्ञानप्रामाण्यं गृह्यते अतो ज्ञानवित्तिवेद्यो विष
यः तन्मतं दूषयति न स्वतो ग्राह्यमिति संशयेति यदा ज्ञानप्रामाण्यं स्वतो ग्राह्यं स्या
त्तदानभ्यासदशायां ज्ञाने प्रामाण्यसंशयो न स्यात् तथा हि यदा ज्ञाने ज्ञाते तदा त्व
न्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः यदि तु ज्ञानं न ज्ञातं तर्हि धर्मिज्ञानाभावात् क
थं संशयः तस्माज्ज्ञाने प्रामाण्यमनुमेयम् तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्ति
जनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमा इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा ग
न्धवति पृथिवीत्वप्रकारकज्ञानत्वात् एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेह
वति जलत्वप्रकारकज्ञानत्वात् न च हेतुज्ञानं कथमिति वाच्यं पृथिवीत्वप्रकार
कत्वस्य स्वतो ग्राह्यत्वात् तत्र गन्धग्राहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात्
तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वपरं न गृह्यते संप्रदायानुरोधात् ननु सर्वे

सा॰

शंकाविधूननद्वारा भूयोदर्शनमुपयुज्यते यत्र तु भूयोदर्शनादपि शंका नापैति तत्र वि
पक्षबाधकतर्कोऽपेक्षितः तथाहि वह्निविरहेऽपि धूमः स्यादिति यदा शंका भवति तदा
सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसंधानान्निवर्त्तते यद्ययं वह्निमान् न स्यात्तदा
धूमवान्न स्यात् कारणं विना कार्यानुपपत्तेः यदि च क्वचित्कारणं विना भविष्यत्यहेतु
७५ कत्ववा भविष्यतीति न व्याप्यकांक्षा भवति स्वव्याघातादप्रसारणी याहि यदि कारणं
विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमत उपादानं नैव स्यादिति यु
क्तत्वेव शंका नावतरति तेन च न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचिच्छंकानिवर्त्त
क इति इदानीमुपाधिं निरूपयति साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स उ
पाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते साध्येति साध्यत्वाभिमतव्यापकत्वे सति साध
नत्वाभिमताव्यापक इत्यर्थः ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वं नोपा य
धिः स्यात्तस्य साध्यव्यापकत्वाभावात् श्यामत्वस्य घटादावपि सत्त्वात् न च शाकपा

स्यतां रंगेरंगाभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात् त्वन्मते रंगे रंग
भेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्वात् दोषादेव रंगे रजतभेदाग्रहस्य रजते रंग
भेदाग्रहस्य च सत्वात् किंच अनुमितिप्रतिभेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधू
मवद्भेदाग्रहादनुमितिनिराबाधा यदि च विशिष्टज्ञानं कारणं तदयोगोलके वह्नि
व्याप्यधूमज्ञानमनुमित्यनुरोधादापतितं सेयमुभयतःपाशारज्जुः इदं चान्यथाख्या
तौ प्रत्यक्षमेव प्रमाणं रंगं रजततया जानामीत्यनुभवादिति संक्षेपः सर्वं व्याप्तिरुक्तौ
तद्ग्रहोपायस्तु न दर्शितः इत्यतस्तं दर्शयति व्यभिचारस्याग्रहोपि सहचारग्रहस्तथा
हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छंकानिवर्तकः व्यभिचारस्येति व्यभिचाराग्रहः सह
चारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबंधकत्वात्
तदभावः कारणं एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता भूयोदर्शनेन तु न
कारणं व्यभिचारास्फूर्तौ सकृद्दर्शनेपि क्वचिद्व्याप्तिग्रहात् क्वचित्तु व्यभिचार

न्या॰
म

धयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता स स्वसाध्यमिति षष्ठीतत्पुरुषभ्रमं वारयितु
माह स्वं च साध्यं स्वसाध्ये तयोर्व्यभिचारितेत्यर्थः उपाधेर्दूषकताबीजमाह व्यभिचारस्या
नुमानमुपाधेस्तु प्रयोजनम् उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानम् यथा
धूमवान्वह्नेरित्यादौ वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वात् इति व्यापक
व्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात् यत्र किंचिद्धर्मावच्छिन्नसाध्यव्यापक
उपाधिस्तत्र न तद्भवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा स श्यामो
मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि गौरमित्रातनये शाकपा
कजन्यत्वव्यभिचारित्वादिति बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभा
वात् स्वव्याघातकत्वाच्च नोपाधिः बाधोन्नीतपक्षेतरस्तु उपाधिर्भवत्येव यत्र वह्निरनु
ष्णः कृतकत्वादित्यादौ प्रत्यक्षेणैव वह्नेरुष्णत्वग्रहे गृहीते स सदुपाधिः यस्य तूपाधेः साध्य
व्यापकत्वादि संदिह्यते स संदिग्धोपाधिः पक्षेतरस्तु संदिग्धोपाधिरपि नोद्भावनीय क

कजत्वाभावात् एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात्
प्रत्यक्षत्वस्यात्माद्यावपि सत्त्वात्तत्र रूपासंभवात् एवं ध्वंसोपि विनाशी जन्यत्वादित्यत्र भाववत्त्वं नो
पाधिः स्यात् विनाशित्वस्य प्रागभावेपि सत्त्वात् तत्र च भाववत्त्वाभावादिति चेन्न यद्धर्मावच्छिन्न
साध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् मित्रातनयत्वावच्छि
न्नश्यामत्वस्य व्यापकं शाकपाकजत्वं । वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकं उद्भूतरूप
वत्त्वं वहिर्द्रव्यत्वावच्छिन्नसाधनाव्यापकं च एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वा
वच्छिन्नसाध्यव्यापकं भाववत्त्वं सद्धेतावेतादृशो धर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं
तदवच्छिन्नस्य साधनस्य चाव्यापकं किंचित्स्यात् व्यभिचारिणि तु साध्याधिकरणं य
त्साध्याधिकरणे यत्रोपाधिस्तन्यं व्यभिचारनिरूपकमधिकरणं तत्र तत्तदन्यतर
साध्य त्वावच्छिन्नस्य साध्यस्य व्यापकं साधनस्य चाव्यापकत्वमुपाधेः संभवतीति अत एव ल
क्षणमप्युपाधिस्वरूपमेतदनुसारेण दर्शयति सर्वे साध्यसमानाधिकरणाः स्युरुपा

मत्वदोपस्थितिपन्नत्वान्नाहस्थपदार्थान्तरवत् दृष्टांतेपिदृष्टांतान्तरेणसाध्यसिद्धिरिति एवंग
वयव्यक्तिप्रत्यक्षानंतरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकं असतिवृत्त्यंतरे वृद्धैस्तत्र प्रयु
ज्यमानत्वात् असतिवृत्त्यंतरे यत्र वृद्धैः यत प्रयुज्यते तत्प्रवृत्तिनिमित्तकं यथा गोपदं गोत्व
प्रवृत्तिनिमित्तकं यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वात् इत्यनुमानेन पक्षधर्मता
बलाद्गवयत्वप्रवृत्तिनिमित्तकत्वं सिध्यति तन्मतं दूषयति तत्रसम्यग्विनाव्याप्ति
बोधं शाब्दादिबोधतः व्याप्तिज्ञानंविनापिशाब्दबोधस्यानुभाविकत्वात् नहि सर्वत्र
शब्दश्रवणानंतरंव्याप्तिज्ञानमानमस्ति इति किंच सर्वत्रशाब्दस्थलेयदिव्याप्तिज्ञा
नंकल्प्यते तदा सर्वत्रानुमितिस्थलेपदज्ञानंकल्पयित्वाशाब्दबोधएवकिंनस्वीक्रि
यते इति द्वैविध्यमनुमानस्यकेवलान्वयिभेदतः द्वैविध्यंतुभवेद्व्याप्तिरन्वयव्यति
रेकतः अन्वयव्याप्तिरुक्तैवव्यतिरेकादथोच्यते अनुमानंत्रिविधं केवलान्वयि

यकसंप्रदायानुरोधादिति केचित्तु सत्प्रतिपक्षोन्नयनमुपाधिफलम् तथाहि अयोगो
लकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववद्वार्द्रेन्धनाभावादिति सत्प्रतिपक्ष
सम्भवात् अयञ्च साधनव्यापकोपि क्वचिदुपाधिः यथा करका पृथिवी कठिन
संयोगवत्त्वादित्यादावनुष्णाशीतस्पर्शवत्त्वं न चात्र स्वरूपासिद्धिरेव दूषणमिति वा
च्यम् सर्वत्रोपाधेर्दूषणान्तरसम्पर्कात् अत्र साध्यव्यापकः पक्षावृत्तिरुपाधिरिति
वदन्ति शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते अनुमानगतार्थत्वादिति वै
शेषिकं मतं वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणं शब्दोपमानयोरनुमानवि
धयैव प्रामाण्य तथाहि दण्डेन गामानयेति लौकिकपदानि यजेतेत्यादि वैदिकपदा
नि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदम्बक
त्वात् घटमानयेति पदकदम्बवत् यद्वा एते पदार्थाः मिथः संसर्गवन्तः योग्यतादि

न्या०
(मु)
८४

मनित्यं नैमित्तिकमिति अग्निसंयोगजन्यं द्रवत्वं नैमित्तिकं तच्च सुवर्णादिरूपे तेजसि घृ
तजतुप्रभृति पृथिव्यां वर्त्तत इत्यर्थः हेतुरिति समवायिकारणमित्यर्थः संग्रहे सक्तुकादि
संयोगविशेषे तत्र द्रवत्वं स्नेहसहितं निमित्तं बोध्यं तेन द्रुतसुवर्णादिना न संग्रह इति स्नेहं
निरूपयति स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ स्नेह इति जल एवेत्यर्थः ननु
पृथिव्यामपि तैले स्नेह उपलभ्यते न चासौ जलीय एव न तथा सति दहनप्रातिकूल्यप्रस
ङ्गादित आह तैलान्तरे तत्प्रकर्षादिह दहनस्यानुकूलता तत्र प्रकर्षात् स्नेहप्रकर्षा
त्तैले उपलभ्यमानः स्नेहो जलीय एव तस्य प्रकृष्टत्वाद्दहनानुकूल्यं अपकृष्टस्नेहं हि जलं वह्निं
विनाशयतीति भावः संस्कारं निरूपयति संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने
मूर्त्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित् स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतु
र्ष्वपि अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणं भावनाख्यस्तु संस्कारो जीववृत्तिर
तीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् वेगः स्थितिस्थापकभावनाभे

नुवर्त्तते स चातीन्द्रियः तत्र प्रमाणमाह शरीरे प्राणसंचारे कारणं तत्प्रकीर्त्तितं शरी
र इति प्राणसंचारोऽध्यधिकश्वासप्रश्वासादिप्रयत्नसाध्यः सुप्तस्य च प्राणसंचारस्य
सर्वस्य यत्नसाध्यत्वमनुमानात् प्रत्यक्षयत्नबाधादतीन्द्रिययत्नसिद्धिः स एव जीवयोनि
यत्नः गुरुत्वं निरूपयति अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् अनित्ये हि नित्यं
स्यान्नित्ये नित्यमुदाहृतं तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि अनित्ये द्व्यणुकादौ ने
तद्गुरुत्वं अनित्यं नित्ये परमाणौ नित्यं गुरुत्वमित्यनुवर्त्तते तद्गुरुत्वमसमवाय्यस
मवायिकारणं पतनाख्य इति आद्यपतने इत्यर्थः द्रवत्वं निरूपयति सांसिद्धिकं द्र
वत्वं स्यान्नैमित्तिकमथापरं सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः द्रवत्वं द्विविधं
सांसिद्धिकं नैमित्तिकं चेत्यर्थः द्वितीयं नैमित्तिकं परमाणौ जले नित्यमन्यत्रानित्य
मुच्यते नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु द्रवत्वं स्पन्दने हेतु निमित्तं संग्रहे तु त
त् जलपरमाणौ द्रवत्वं नित्यमन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्व

न्या॰ बो॰

तावत्त्वेनैव संस्कारकल्पनायां गुरुत्वात् संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुतायाः सि
द्धत्वात् तत्र प्रमाणं दर्शयति स्मरणे प्रत्यभिज्ञायामप्यनुभवो हेतुरुच्यते अत्रैको संस्कारः यतः
स्मरणं प्रत्यभिज्ञां च जनयत्यतः कल्प्यते विना व्यापारं पूर्वानुभवस्य स्मरणादिजनकत्वासं
भवात् स्वस्वव्यापारान्यतराभावे कारणत्वासंभवात् न च प्रत्यभिज्ञां प्रति तत्तत्संस्कार
८५ स्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यं अप्रयोजकत्वात् प
रैतत्त्वनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयात् उद्बुद्धसंस्कारस्य हेतुत्वापेक्षायां तत्र स्मर
णस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः अदृष्टं निरूपयति धर्माधर्मावदृष्टं
स्यादुद्धर्मः स्वर्गादिसाधनं धर्माधर्माविति स्वर्गादीति स्वर्गादिसकलसुखानां स्व
र्गसाधनीभूततीर्थादीनां च साधनं धर्म इत्यर्थः तत्र प्रमाणं दर्शयितुमाह यागादि
गंगास्नानादिव्यापारः सत्कीर्तितः यागादिव्यापारजन्यो हि धर्मः कल्प्यते अन्यथा या
गादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वेन स्यात् तद्

देन संस्कारस्त्रिविध इत्यर्थः कर्मज इति कर्मजवेगजभेदात् वेगो द्विविध इत्यर्थः प्रथमा
द्ये हि नोदनाजन्मनि तेन पूर्वकर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशः तेन उत्तरकर्म एवम
ग्रेऽपि किंनाच वेगं कर्मणः कर्मप्रतिबंधकत्वात् पूर्वकर्मनाशउत्तरकर्मोत्पत्तिश्चानस्या
त् यत्र च वेगवता कपालेन जनितेन घटे यो वेगः स वेगजो वेगः स्थितिस्थापकेति आकृष्ट
शाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् केचिदिति चतुर्षु
दित्यादिषु स्थितिस्थापकं केचिन्मन्यंते तदप्रामाणिकमिति भावः तत्र स्थितिस्थापकं क्वचि
त् आकृष्टशाखादौ भावनाख्य इति तस्य संस्कारस्योपेक्षात्मकज्ञानात् संस्कारानुत्प
त्तेरुपेक्षानात्मक इत्युक्तं तत्प्रयाणस्य तु अनुभवेन निश्चय इत्युक्ते तेनोपेक्षात्मकनि
श्चयेन संस्कारं प्रति हेतुतेति भावः ननु स्मरणं प्रत्युपेक्षात्मकनिश्चयत्वेन हेतुत्वे
नोपेक्षादिस्थले न स्मरणम् इत्यत्र च संस्कारं प्रति ज्ञानत्वेन हेतुतास्त्विति चेन्न विनि
गमनाविरहेऽपि संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किंचोपे

मा॰
मु॰
८२

गुरुणा प्रायश्चित्तादिनाशप्रसक्ति यद्यदृष्टधर्मो न स्यात् तदा प्रायश्चित्तादिनाश्यत्वेन स्यान्नहि
तेन ब्रह्महननादेर्नाशः प्रतिबंधाभावाविधातुं शक्यते न स्यादेवमेव विरुद्धत्वादिति भावः
जीवतीति ईश्वरस्य धर्माधर्माभावादिति भावः इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः
इमौ धर्माधर्मौ वासनेति ज्ञातो ज्ञानिनां कृतेपि सुकृतदुःकृते न कर्मणा न फलायालमिति भावः
ज्ञानादपीत्यपि नाभोगपरिग्रहः ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वे नाभुक्तं क्षी
यते कर्म कल्पकोटिशतैरपि इति वचनविरोधात् इत्थं च तत्त्वज्ञानिनां झटिति कायव्यू
हेन सकलकर्मणां भोगेन क्षय इति चेन्न तत्र भोगस्य वेदबोधितनाशकत्वोपलक्षक
त्वात् कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशोस्ति उक्तं ज्ञानाग्निः सर्वकर्माणि भस्मसा
त्कुरुते तथेति क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति ननु तत्त्वज्ञानिनः तर्हि श
रीरावस्यात् सुखदुःखादिकं च न स्यात् ज्ञानेन सर्वेषां कर्मणां नाशादिति चेन्न प्रारब्धेत
रकर्मणामेव नाशात् तच्छरीरे भोगजनकं हि यत्कर्म तत्प्रारब्धं तदभिप्रायमेव नाभु

८२

क्रमाचार्यैः चिरध्वस्तं फलायालं न कर्मातिशयं विनेति ननु यागध्वंस एव व्यापारः स्या
त् नच प्रतियोगिध्वंसयोरेकत्राजनकत्वे सर्वत्र तथात्वे मानाभावात् नच तन्मते फलाने
कत्वमन्मते चरमफलस्यापूर्वनाशकत्वात् न तथात्वमिति वाच्यं कालविशेषस्य सहकारि
त्वादित्यत आह गंगास्नानेति गंगास्नानस्य हि स्वर्गजनकत्वेऽनेनानां जलसंयोगध्वंसानां
व्यापारत्वमपेक्ष्यैकमेवापूर्वं कल्प्यते लाघवादिति भावः ननु ध्वंसोपि न व्यापारोऽस्तु नच
निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यं अनन्यथासिद्ध नियतपूर्ववर्तित्व
मिव समवायिकारणस्य कारणत्वमित्यत आह कर्मनाशाजलस्पर्शादिना नाशप्रसंगो
मतः अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः कर्मनाशेति यदि चापूर्वं न स्यात्तदा कर्म
नाशाजलस्पर्शादिना नाशप्रसक्ते धर्मस्य न स्यान्नहि तेन यागादेर्नाशः प्रतिबंधो वा कर्तुं श
क्यते तस्मादपूर्वमेवस्वीकर्त्तव्यमिति नरकादीनामिति नरकादिदुःखानां नारकीयशरीरा
णां च साधनमधर्म इत्यर्थः तत्र प्रमाणमाह यायाश्रितादिना श्येनादेर्जीवस्वर्गहिंसेमो

ति जन्मतेन पयाभिमतः स्वर्गादिरेव वदयते २